गणेशब्रह्मविष्णुभ्यो हराय परमेश्वरि ! ॥
जीवात्मने क्रमेणैव तथैव परमात्मने ।
षट्शतानि सहस्राणि सहस्रच तदेव हि ।
पुनः सहस्रं गुरवे क्रमेण च निवेदयेत् ”*॥
एवं यथास्थानावस्थितेभ्यो गणेशादिभ्यस्त-
ज्जपसमर्पणमुक्ता तत्तत्स्थानानां तत्तदवस्थित-
मातृकार्णानाञ्च रूपमाह तत्रैव ।
“आधारे स्वर्णवर्णेऽस्मिन् वादिसान्तानि
संस्मरेत् ।
द्रुतसौवर्णवर्णानि वर्णानि परमेश्वरि ! ॥
स्वाधिष्ठाने विद्रुमाभे वादिलान्तानि च स्मरेत् ।
विद्युत्पुञ्जप्रभाभानि सुनीले मणिपूरके ॥
डफान्तानि महानीलप्रभाणि च विचिन्तयेत् ।
पिङ्गवर्णे महावह्निकलिकाभानि चिन्तयेत् ॥
कादिठान्तानि वर्णानि चतुर्थेऽनाहते प्रिये ।
विशुद्धे धूम्रवर्णे च रक्तवर्णान् स्वरान् यजेत् ॥
आज्ञायां विद्युदाभायां शुभ्रौ हक्षौ विचि-
न्तयेत् ॥
कर्पूरद्युतिसंराजत्सहस्रदलनीरजे ।
नादात्मकं ब्रह्मरन्ध्रं जानीहि परमेश्वरि ।
एतेषु षट्सु चक्रेषु स्थितेभ्यः परमेश्वरि ! ॥
जपं निवेदयित्वा तं अहोरात्रभवं प्रिये ।
सहजं परमेशानि न्यासं कुर्याद्विचक्षणः ॥
ऋषिर्हंसोऽव्यक्तरूपगायत्री च्छन्द उच्यते ।
देवता परमादिस्तु हंसोऽहं बीजमुच्यते ॥
सः शक्तिः कीलकं सोऽहं प्राणवस्तु त्वमेव हि ।
नैवस्थलं भवेत् श्वेतं वर्णश्च परमेश्वरि ! ॥
तदा तत्त्वह इत्येवं मनोरस्य प्रकीर्त्तितः ।
मोक्षार्थे विनियोगः स्यादेवं जानीहि पार्व्वति ॥
ततः षडङ्गविन्यासं कुर्य्याद्देहस्य सिद्धये ।
सूर्य्यं सोमं महेशानि निरञ्जनमतः परम् ॥
निराभासं चतुर्थ्यन्तं स्वाहान्ते क्रमतो न्यसेत् ।
कवचान्तं प्रविन्यस्य ततोऽनन्तपदं स्मरेत् ॥”
इति च तत्रैव ७ पटलः ॥*॥
अजपाया द्वैविध्यमुक्तं यथा,—
“हंसेति प्रकृतिर्ज्ञेया ॐकारः प्रकृतेर्गुणः ।
हंकारेण बहिर्य्याति सकारेण विशेत् पुनः ॥
हंसेति परमं मन्त्रं जीवो जपति सर्व्वदा ।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अजपा द्विविधा देवि ! व्यक्ता गुप्ता क्रमेण च ।
व्यक्ता च द्विविधा प्रोक्ता शब्दज्योतिःस्वरू-
पिणी ।
ज्योतीरूपा च सा देवी हृदिस्थाने प्रतिष्ठिता ।
ठकाररूपा गुप्ता च शिवशक्तिः प्रकीर्त्तिता ।
चन्द्रबीजं ठकारस्तु बोधितः स्वर उच्यते ॥
शब्दार्थमयी गुप्ता वह्निजाया प्रकीर्त्तिता ।
अस्याः सङ्कल्पमात्रेण पुरश्चरणमुच्यते ॥”
इति निरुत्तरतन्त्रे ४ पटलः ॥
(जरासन्धनृपतेः सेनापतिविशेषः । यथा, महा-
भारते । २ । २२ । ३१—३२ ।
“स तु सेनापतिं राजा ससार भरतर्षभ ।

कौशिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते ॥
ययोस्ते नामनी राजन् ! हंसेति डिम्भकेति च ।
पूर्व्वं सङ्कथिते पुंभिर्नृलोके लोकसत्कृते ।”*॥
मेरोरुत्तरस्थपर्व्वतविशेषः । यथा, विष्णुपुराणे ।
२ । २ । २८ ।
“शङ्खकूटोऽथ ऋषभो हंसो नागस्तथा परः ।
कालञ्जराद्याश्च तथा उत्तरे केशराचलाः ॥”)
हंसकः, पुं, ( हंस इव कायति मधुरध्वनित्वात् ।
कैशब्दे + कः । ) पादकटकः । यथा,—
“पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ।
हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका ॥”
इत्यमरः । २ । ६ । १०९ ॥
“षट् नूपुरे । केचित्तु पादाङ्गदादिचतुष्कं चरण-
भूषणे नूपुर इति ख्याते । हंसकादिद्वयं रवशून्ये
हंसाकृतिचरणभूषणे इत्याहुः । हंस इव
कायति मधुरध्वनित्वात् हंसकः । कै शब्दे डः ।
हंसाकृतित्वात् हंस इव हंसकः इति वा ।
इवार्थेविकारसंघ इत्यादिना कः ।”इति भरतः ॥
(हंस इवेति । इवे प्रतिकृताविति कन् । स्वार्थे
कन् वा ) राजहंसः । इति शब्दचन्द्रिका ॥
( यथा, माघे । ७ । २२ ।
“सरित इव सविभ्रमप्रयात-
प्रणदितहंसकभूषणा विरेजुः ॥”
तालप्रभेदः । यथा,—
“लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ॥”
इति सङ्गीतदामोदरः ॥
हंसकीलकः, पुं, ( हंस इव कीलतीति । कील
बन्धने + ण्वुल् । ) रतिबन्धविशेषः । यथा,—
“नारीपादद्वयं कृत्वा कान्तस्योरुयुगोपरि ।
कटिमान्दोलयेद् यत्नात् बन्धोऽयं हंस-
कीलकः ॥”
इति स्मरदीपिका ॥
हंसकूटः, पुं, ककुत् । इति केचित् ॥ ( पर्व्वत-
विशेषः । यथा, महाभारते । १ । ११९ । ४९ ।
“इन्द्रद्युम्नः सरः प्राप्य हंसकूटमतीत्य च ।
शतशृङ्गे महाराज तापसः समतप्यत ॥” )
हंसगद्गदा, स्त्री, ( हंस इव गद्गदो यस्याः । )
मधुरभाषिणी । तत्पर्य्यायः । मधुरनिस्वना २ ।
इति त्रिकाण्डशेषः ॥
हंसगामिनी, स्त्री, ( हंस इव गच्छतीति । गम +
णिनिः । ङीप् । हंसगमनमिव गमनं यस्याः
सा इति वा । ) नारीविशेषः । ( हंसेन गच्छ-
तीति । ) ब्रह्माणी । इति हंसारूढाशब्द-
दर्शनात् ॥
हंसदाहनं, क्ली, ( हंसं श्रेष्ठं सुरभित्वात् दाहनं
यस्य । ) अगुरु । इति शब्दचन्द्रिका ॥ ( गुणा-
दयोऽस्या अगुरुशब्दे ज्ञातव्याः ॥ )
हंसनादिनी, स्त्री, ( हंस इव नदतीति । नद +
णिनिः । ङीप् । नारीविशेषः । तस्या लक्षणं
यथा, शब्दमालायाम् ।
“गजेन्द्रगमना तन्वी कोकिलालापसंयुता ।
नितम्बगुर्व्विणी या सा कथ्यते हंसनादिनी ॥”

हंसपदी, स्त्री, ( हंसस्येव पादा मूलान्यस्याः ।
ङीप् । पादस्य पद्भावः । ) गोधापदी । इति
राजनिर्घण्टः ॥ हंसपदीविशेषः । तत्पर्य्यायः ।
मधुस्रवा २ हंसपादी ३ त्रिपदी ४ । इति रत्न-
माला ॥ ( अस्याः पर्य्यायो यथा,—
“हंसपादी हंसपदी कीटमाता त्रिपादिका ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
हंसपादं, क्ली, ( हंसस्य पाद इव वर्णो यस्य । )
हिङ्गुलम् । इति हलायुधः ॥ ( पुं, यथा,—
हिङ्गुलन्दरदं म्लेच्छमिङ्गुलञ्चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्यात् गुणवानुत्तरोत्तरम् ।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ।
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
हंसचरणे च पुं ॥
हंसपादिका, स्त्री, (हंसपादी एव स्वार्थे कन् ।
टाप् । ) हंसपदी । इति राजनिर्घण्टः ॥
हंसपादी, स्त्री, (हंसस्य पादा इव मूलान्यस्याः ।
ङीप् । ) हंसपदीविशेषः । इति रत्नमाला ॥
(अस्याः पर्य्यायो गुणाश्च यथा,—
“हंसपादी हंसपदी कीटमाता त्रिपादिका ।
हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ॥
विसर्पदाहातिसारलूताभूताग्निरोहिणीः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
हंसबीजं, क्ली, ( हंसस्य बीजम् । ) हंसडिम्बः ।
तस्य गुणाः यथा, राजनिर्घण्टे ।
“हंसबीजं परं बल्यं वृंहणं वातनाशनम् ।
पाके लघुतरं प्रोक्तं सर्व्वामयविनाशनम् ॥”
हंसमाला, स्त्री, ( हंसस्य माला । ) कादम्बः ।
इति शब्दचन्द्रिका ॥ हंससमूहः । यथा,—
“तां हंसमालाः शरदीव गङ्गां
महौषधीर्नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥”
इति कुमारसम्भवे । १ । ३० ॥
हंसमाषा, स्त्री, हंसः श्रेष्ठो माषो यस्याः । )
माषपर्णी । इति राजनिर्घण्टः ॥
हंसरथः, पुं, ( हंसो रथो वाहनं यस्य । ) ब्रह्मा ।
इति त्रिकाण्डशेषः ॥
हंसलोमशं, क्ली, ( हंस इव लोमशम् । ) कासी-
सम् । इति राजनिर्घण्टः ॥
हंसलोहकं, क्ली, ( हंसं श्रेष्ठं लोहमिव । कन् ) ।
पित्तलम् । इति हेमचन्द्रः ॥ ( विवरणमस्य
पित्तलशब्दे ज्ञातव्यम् ॥ )
हंसवती, स्त्री, ( हंस इव हंसपदाकार इव
मूलमस्त्यस्या इति । हंस + मतुप् । ङीप् ।
मस्य वः । ) हंसपदीलता । इति जटाधरः ॥
हंसयुक्ते, त्रि ॥
हंसवाहनः, पुं, ( हंसो वाहनं यस्य । ) ब्रह्मा ।
इति काशिदमरः । १ । १ । १७ ॥ ( यथा,
श्रीमद्भागवते । ७ । ३ । १६ ।